वंप्रकृततावच्छेदकव्याप्यत्वमेवस्वरूपसंबंधेनरूपावच्छेदकत्वसागोपप्रेतः एवंचतादृशावच्छेदकत्वा
संभवादिसर्वसत्कादृशावच्छेदकतापर्याप्त्यधिकरणत्व। संभवादिसर्थः। एतच्चपर्याप्तिनिवेशे। संभवतो
कं। निरुक्तव्याप्तित्वंप्रकृतसाध्यकानुमितिप्रयोजकव्याप्तित्वं। धूमत्वेनाग्निपूर्ववद्रूपहेतुतावच्छेदकपद
भावमेकस्यैवधूमत्वस्योपदानसंभवादिति। प्रमेयं तु एतत्व्यापकादिसाध्यव्याप्तिसंभवात्तव्यतिरेक

ग.टी.
१५८
व्याप्तेर्हेतुतावच्छेदकत्वानुसरणं व्यर्थमित्यत आह अस्येति। प्रकृतसाध्यस्येति। वह्न्यभाववत्त्वान्न वह्निव्या
पकीभूताभावप्रतियोगिमत्त्वादित्यादौ। तस्य मानाभावात्प्रकृतहेतुतावच्छेदकावच्छिन्नविशेषणता
पादकग्रहे पावच्छिन्नप्रतियोगितारूपप्रकृतहेतुतावच्छेदकान्वेव्यास्यतत्त्वबोधं विनानुमितिः तस्य मता
कारेण व्याप्तित्वानुपगमादिति ध्येयं तत्कालीनतादृशानुमितिजनकतापात्रं तत्र व्यास्यविषयकपक्ष
धर्मताज्ञानसाधारणमभिमानं तिवह्निकमाह नहि तिष्ठतीति। पुरस्काभिम। नमतिराकृत्यैव समा
धानं निर्वाह्यमहप्रकृतेति। विशेषणतापन्नेति तत्स्वात्त्वव्याप्तेरवच्छेदकानतिरेकव्याप्तिरिति पर्या
प्तत्वमाले व्याप्तेः। स्वपत्वादिविशिष्टेति। यद्यपि प्रकृतहेतु विशेषणतापन्नपदरूपावच्छिन्नप्रकारतानवस्था
संबंधरूपतनकतावच्छेदकतावतीत्युक्तौ मेयत्वावच्छिन्नप्रकारतायानिरूपकत्वे न संभवतः व्याप्यनुमितेः राम०
पपिकत्वस्य लिङ्गपत्वादिगर्भतया तत्कत्वमुपरिष्कारार्थो यमारंभः। ननु वह्निव्यापकीभूताभावप्रतियो १५९

मित्वावच्छिन्नविशेषणतानापन्नवह्निव्यापकीभूताभावप्रतियोगित्वावच्छिन्नप्रकारकनिश्चयत्वस्यापि जन
कतानतिरिक्तत्वात्तत्स्वरूपसंबंधरूपत्वदवच्छेदकत्वात्तत्र व्याप्तिः परिहर्तुं शक्यते इत्यत आह वस्तुत
स्तु व्याप्यतया विषयेकहेतुतावच्छेदकीभूतव्यतिरेकव्याप्तिविशिष्टपक्षधर्मतानिश्चयस्य करणत्वानि
मानं निरस्तमेव पूर्वं निष्कृष्टमनुमित्यौपयिकव्याप्तित्वं दृश्यप्रतिवस्तुन स्थितिः। यद्वयं तत्पदद्वयं अन्वयव्याप्ति
त्वव्यतिरेकव्याप्तित्वोपपदविशिष्टावच्छिन्नत्वं विवक्षितं। तेन नमः पत्वादिनान्वयादिसाध्यकावच्छिन्नप्रकृतत्वे हे
तुनिश्चयेन तत्तिरिक्तः इति विवेकेऽपि न क्षतिः। तथा च वह्निव्यापकीभूताभावप्रतियोगिमानिति परामर्शोक्ता
नोनानुमितिं प्रत्युपयोजकव्यतिरेकव्याप्तिमादाय न तत्र व्याप्तिः। यद्वा अवच्छिन्नप्रकारकनिश्चयत्वस्य हे
तुतावच्छेदकावच्छिन्नप्रकारकनिश्चयत्वस्य सतत्वजनकतानतिरिक्तत्वात्तद्भावनिवेशः। एवं च प्रकृते
हेतुतावच्छेदकावच्छिन्नविशेषणतानापन्नपदद्वयावच्छिन्नप्रकारतापर्याप्तिविशेषेण लैङ्ग्यस्य निवेशोपेक्षाद्यनुपादे

गदि॰ ९६ यः अत्र चपादस्य रूपपदेन व्याप्तित्वावच्छिन्नोपादाने धूमवान्वह्नेरित्यादावन्वयव्याप्तिभ्रमदशायां केवला
न्वयित्वानुपपत्तिः तत्र व्याप्यप्रसिद्धेः विपक्षतानिरूपकस्य साध्यपपादप्ररूपविशिष्टविपक्षतानिरूपि
तप्रकारकत्वघटितधर्मस्यस्वरूपसंबंधरूपावच्छेदकत्वाप्रसिद्ध्या। नतिरिक्तवृत्तित्वनिवेशाविरोध
इति सदनुमानेप्येवं लक्ष्यतामभिप्रेत्य न व्याप्तिर्विशिष्टातन्नमात्मकरणात्मतक्रमन स्वत्वेनस्वरूपसंबंध
रूपावच्छेदकत्वनिवेशव्यतिरेकव्याप्तेर्हेतुतावच्छेदककस्थलेतादृशव्याप्तिविषयताघटितधर्मस्य
स्वरूपसंबंधरूपावच्छेदकत्वेनाव्याप्तिभियेवानतिरिक्तवृत्तित्वनिवेशानं। यद्यपि अनतिरिक्तवृत्तित्वाभि
वेशे विपक्षताऽनाधेयतावच्छिन्नविषयितात्वमादायासंभववारणं तथापि विषयितागतधर्मः अन्वयव्या
प्तित्वावच्छिन्नविषयताव्यतिरेकव्याप्तित्वावच्छिन्नविषयतान्यतरत्वेन विशेषणीयः। विषयताभि राम॰
रूपितहेतुतावच्छेदकावच्छिन्नविषयतेत्यादिक्रमेण वा विषयतायामन्वयव्यतिरेकव्याप्तित्वेन निवेशः ९६

इतिनासंभवः। यद्यपितादृशविषयतानिरूपितधर्मस्यस्वरूपसंबंधरूपावच्छेदकत्वपर्याप्तिनिवेशःसंभ
वतितथापितथाविपर्ययस्यचोलावनेमहद्गौरवंबोध्यं। उक्तप्रकारकावारणायकेवलपदस्यधर्मताज्ञानस्यहे
तुत्वेनिरस्यति। मेयत्वादिकमित्यादिना। आदिनावह्निव्याप्यकाभावप्रतियोगित्वादिपरिग्रहः। तेनेता
दृशप्रतियोगित्वावच्छिन्नतादृशप्रतियोगिताअपवत्त्वज्ञानस्यापिजनकत्वाभिमाननिरसः। एतेननु
पदरूपहेतुता। वच्छेदकशरीरप्रवेशोहेतुतावच्छेदकत्वानिवेशेकव्याप्युपादानेनसंभवतीतिकेवलपदस्यधर्म
ताशेनस्यजनकताश्रयतयाः नतिरिक्तरणितत्वासंभवादितिसूचितं। ननुजलत्वत्वावच्छिन्नताद
शप्रतियोगित्वविशिष्टजलत्वादेर्पिनहेतुतानत्रानुपपत्त्यास्वविषयताकहेतुतावच्छेदकविशिष्टप्र
कारकज्ञानस्यापिकारणत्वमुपेयं। अन्यथाशुद्धजलत्वेनवह्न्यभावानुमानापत्तेस्तथाचतन्नुरोधे
नतिरिक्तवृत्तितत्वमेवानुसारपत्रेस्तथाचनदनुरोधे) एवंचकेवलत्वाचपितिनादृशप्रतियो। गितावि

गदा० शिष्टत्वं न तत्त्वरूपहेतोः आपि विशिष्टान्तत्र केवलान्वयिनि वे किं नाम हेतुवृत्तित्वान्तदवच्छिन्नं त्वंशितानादृशप्रति
१६१ योगिजलत्वावच्छिन्नं शेः एवं च केवलान्वयिनापि ससंगच्छते इति भावः। प्रतियोगित्वांतसहेतु व्यर्थकत्वाभावि
११८ ष्यतोति अपि त्विति। एतत्राम्नम्प्रत्यापत्रेरवच्छेदिकावन्निरूपितामिति स्वान्वयव्याप्तिविशिष्टहेतु
तावच्छेदकीभूतत्वातिरिक्तास्यवच्छिन्न सामंकरस्तामिमाशयो विवृतः। मतु सैवेयं शा शमाहति स्तुके
ति। न तु तत्त्वेन रूपेणान्वयेः। न यावत्तादृशप्रतियोगित्वप्रकारकत्वान्तसहेतुत्वं भावप्रतियोगितावच्छे
दकान्वयांशमाहितयाजनकत्वमावाधादशरूपेरेन तादृशप्रतियोगित्वे स्वायाधनांस्वभवान्माव
प्तिरिति भावः। उपपुस्तकमिति। अनुमितित्वमनुपपत्तेः। तादृशप्रतियोगित्वसंपादनाय व्या
प्तित्वेन ग्रहीतावच्छेदकनयाहेतुतावच्छेदकनिवेश आवश्यकः। अन्यथा धूमाभावव्यापकाभावप्र राम०
तियोगित्वाभावविशिष्टवस्त्वादेरपि दोषत्वापत्तेः। इदानीं तु तादृशप्रतियोगितावच्छेदकत्वविशिष्टवह्नि १६१

त्वाप्रसिद्धेस्तदभावविशिष्टवृक्षादेर्दौघत्वासंभवाद्वाग्निधर्मितावच्छेदकतयाहेतुतावच्छेदकनिवेशोन
कार्यइत्यत्रर्थापत्तिव्याप्तीत्यादिस्वरूपसिद्धिसंग्रहायानुमततयाहेतुतावच्छेदकनिवेशसूचकं। एतेनव्य
तिरेकव्याप्तेरपिहेतुतावच्छेदकघटितत्वमवस्थापनेन। ऽऽक्रानुमानस्यव्याप्तिविषयकत्वेलिंगमत्तान
स्मतद्रूपावच्छिन्नव्यतिरेकित्वमितिपाठः। तद्रूपावच्छिन्नत्वान्नपर्यवसन्निवेशिकिन्वमितिपाठश्चनव्यव्याप्त
वगाहित्वेनज्ञानंद्रष्टव्यंहेतुनिर्देशेति। तद्दृशाभावप्रतियोगिमत्त्वात्तद्गंधव्यापकीभूताभावप्रतियो
गिमत्त्वाद्धेमाद्रावत्त्वपव्याप्तेरवच्छेदकव्यतिरेकव्याप्तिनेप्रवृत्तस्याथानुमितेरौपयिकत्वेहिस्थितोपस्थ
धर्मताग्रहेपिविगंधत्वानुमितेरनुदयात्तेस्तेवधूमविनश्यपैवासत्तिमित्कृत्वनित्वगर्भानुमितौ
पक्षिकत्वनिराकरणात्एषक्षेवस्यभाववत्त्वानुवर्तिव्यापकीभूताभावप्रतियोगित्वहेतुतावच्छेद
ककानुसरणस्यवीजोसंभवत्वकल्पनासंभवादितिचेन्न। तत्प्रकारप्रवर्तत्रैधिनिकारणाविनासप्र

गदा० १६२ ण्यः। अत्र च प्रतिभाति। ननु निर्धूमभिन्नत्वादौ हेतुतावच्छेदकस्य प्रकृतसाध्यानुमित्यौपयिकत्वा
१६२ स्यानात्मनकत्तयाकेवलं न हि विशिष्टज्ञानस्यान्यथासिद्धत्वं पाचव्याप्यत्वविषयकं न हेतुमानमेवकार
१०६ णं वाऽनुमितिं नत्वनतिरिक्तत्वानतिप्रसंगिक इति तद्गर्भानुमित्यौपयिकत्वनिराकरणाकूतं तत्तत्त्वप्रा
विधानुमित्यौपयिकत्वविशेषेऽपि तादृशव्याख्यानाक्रमे हेतुतावच्छेदकस्य लेख्यादृष्टत्वेनाबोधेऽपि न
हि विशिष्टज्ञानमेव तज्ज्ञानकेऽसत्ये व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वविशिष्टपरामर्शो वा व्याप्तिविशिष्टस्यकाप
मत्वपरामर्शे हेतुतावच्छेदकान्यतिरिक्तव्याप्तिविषयित्वं हि तेन तथात्वे हेतुतावच्छेदकावच्छिन्नविशेष्यता
नावच्छिन्नव्याप्तिप्रकारकनिश्चयत्वेन कारणताया न तु संभवेति स्वस्वपरामर्शस्य च्छेदकातिरेकव्याप्ति
नतिरिक्तवृत्तित्वगर्भानुमित्यौपयिकीनत्वाच्चकेवलहेतुतावच्छेदकविशिष्टज्ञानस्य व्याप्तिविशि राम०
ष्टहेतुतावच्छेदकविशिष्टवैशिष्ट्यनिश्चयत्वेनास्तीति प्रकारतामात्रमप्तिरिति स्वव्याप्तिविशिष्ट १६२

ज्ञानस्यव्याप्तिविशिष्टहेतुतावच्छेदकविषयमत्वावच्छिन्नप्रकारकनिरूपकत्वस्यजनकता।नतिरिक्तवृत्ति
त्वघापकत्वादेनतादृशज्ञानेनव्याप्तेरेवपक्षस्यैकोपोदेप तथाऽसंभवस्यदुर्वारत्वादितिचेन्न।तादृशरूपस्य
तादृशरूपेणतदधारितत्वेनविरोधानुपपत्वात्।प्रकृतसाध्यकप्रकृतहेतुकेतिदीधितिपाठाभावेपिपद्
पावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपकत्वादिनिवेशादेवप्रकृतहेतुकत्वसंभवदृष्ट्याभि
प्रेत्यादिहन्तनेकतामिति।प्रकृतहेतुकत्वंचव्याप्तिविशेषणं।पृथ्वीकृतसाध्यकत्वमनुमितिविशेषणं।पृ
थिवीत्वेन।पृथिवीत्वव्यापकीभूताभावप्रतियोगितावच्छिन्नाभाववद्धेतुवृत्तित्ववच्छेदककोटावप्रविष्टत
त्वेवतादृशाभावप्रवेशात्ताश्रयपरत्वार्थः।तादृशप्रतियोगितानपतिंगज्ञानमितिपर्यासूतार्थःसमूहालं
बनात्मकलिंगकरणतामतेनअत्रकेवलव्यतिरेकितादृशीत्यत्रानुमितिजनकतावच्छेदकत्वप्रकारता
निरूपितलिंगविषयतापांवाऽसत्वात्तदन्निव्याप्तिरतःसामग्रीत्यपदव्यापकाभावप्रतियोगितावच्छेदकतानि

गदा० रूपितान्वयव्याप्तिप्रकारतानिरूपितलिंगविषयतायाः अनुमित्यौपयिकत्वाद्व्याप्तिरूपेणान्वयप्रकारता
१६३ नपेक्षा। साध्याभाववानिति निरुक्ते निर्य्यग्निरेकिवारणाय। लिंगतावच्छेदकेति जलत्वेन निर्गंधमि साध्यव्याप्ति
८१० वारणाय। व्यतिरेकसहचारमिति। स्वनिष्ठप्रकृतसाध्यविधेयताप्रयोजकसहचारविषयताशालिव्या
पकव्यतिरेकसहचारविषयताशालिकानुमितिकरणत्वमित्यर्थः। व्यतिरेकव्याप्तिमिति प्रकृतसाध्यविष
यकानुमितित्ववृत्तिनधर्मावच्छिन्नजनकतानिरूपितानुमितिनिष्ठकार्यतानिरूपितकारणता
पायादृशरूपावच्छिन्नहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वमवच्छेदकं तादृशरूपनिष्ठ
विषयताशालिव्यापकव्यतिरेकव्याप्तित्वावच्छिन्नविषयताशालिकानुमितिफलोपधायककरणत्वमित्यर्थः। उभ
येति स्वनिष्ठप्रकृतसाध्यविधेयताप्रयोजकान्वयव्यतिरेकसहचारविषयताशालिकानुमितिकरणत्वं तथा राम०
विधान्वयव्यतिरेकव्याप्तिविषयताशालिकानुमितिकरणत्वं च क्रमेणार्थः। दुष्टत्वादित्यादि आकाशपदादू १६३

मत्वादिना शाब्दबोधवारणाय। प्रथमोदृते। धर्मत्वरूपहेतुमति अ सामान्याभावप्रतियोगितावच्छेदके
त्वपात्वस्पकेवलान्वयित्वम्: स्वगुणनाश:स्वाभावसत्त्वे नेति स्वगुणाभाव: नच स्वगुणसंगाभावा
भावरूपसंयोगादिसंबंधसत्त्वेनेमर्थः अभावासत्त्वप्रसंगः संयोगादिसंबंधावच्छिन्नप्रतियोगिता
कगुणात्यंताभावासत्त्वप्रसंगः केवलेति। केवलान्वयितावच्छेदकसंबंधसामान्ये यदभावप्रतियोगिप्र
तियोगिकत्वाभावमात्रनिवेशे संयोगाभावेः केवलान्वयित्वापत्तिः संयोगप्रतियोगिकसमवाये संयोग
प्रतियोगिकत्वसत्त्वेन संयोगाभावे प्रतियोगिसामानाधिकरण्याभावात्। किंचैदधिकरणानुयोगिक
त्वनिवेशे च संयोगिकसमवाये गुणानुयोगिकत्वादेवाभयाभावसत्त्वात् दोषः। तादृशवादाद्द्रूपकिं च वि
दितिनेयधिकरणेत्युपादानं यद्भावविशेषणत्वार्थं केवलान्वयितिधर्मस्यन कदाचिदपिकिं वि
द्धिकरणवृत्तिनानवच्छेदकः सर्वत्रैवाधिकरणे केवलान्वयिनो वृत्तेः किंतु वातिरेकि धर्मस्य वत्तथा

गदि० १६४ तदवच्छिन्नाभावप्रतियोगित्वाधिकरणत्वं किन्न सत्तासमवायः संयोगाभावस्य च गुणादिवृत्तितानवच्छे-
दकीभूतसंयोगत्वावच्छिन्नप्रतियोगिताकसंयोगस्य केदाचिद्वृत्तितावच्छेदकत्वात् सामान्यादिवृत्तित्वस्य
२१२ समवायानवच्छिन्नतया धर्मत्वात् तु सत्ताभावस्य लक्षणाघटकत्वात् । न च तस्य स्वस्य संबंधावच्छे-
न्नवृत्तितानवच्छेदकता ते देवरतिवाय्यं समवायेन ज्ञानाद्यभावमादाय ज्ञानादावव्याप्तेर्वारणात्
पक्षे केवलान्वयित्वघटकसंबंधावच्छिन्नवृत्तितायामसंयोगाद्यवृत्त्यव्याप्यत्वादिति चेन्न केवलान्वयित्वघट-
कसंबंधावच्छिन्नत्वकपदेन पारिभाषिकनिरूपितवृत्तितासामान्ये केवलान्वयित्वघटकसंबंधावच्छिन्नत्व-
तद्धर्मावच्छिन्नत्वाभावस्य तद्धर्मावच्छिन्नप्रतियोगितानवच्छेदकसमवायत्वात् । अथ पक्षे केवला-
न्वयित्वघटकसंबंधे पारिभाषिकवृत्तितावच्छेदकत्वाये स्यादिदशकेवलान्वयित्वस्य किं लाघवमिति गम०
चेत् । न किंचित् । न्यूनताभंगार्थमेव भावीनव्यैर्भासमस्य वर्णनानुसरणात् अन्यत्र पारिभाषिकाधिकरणता १६४

रतित्वसामान्येयत्संबंधावच्छिन्नत्वपर्याप्त्यवच्छिन्नप्रतियोगिता) तोभयाभावस्तद्धर्मभिन्नधर्मेवान्याके
वलान्वयिन्नमित्यत्र लाघवं। वाच्यत्वत्वेतिशिष्टवान्यत्वन्त्वादिमेयसत्वेनतद्धर्मावच्छ्यो मविक्षयनावत्व
विवक्षितायं। पदेकेवलावृबंधेन तद्धर्मान्यधर्मेवत्वं। वच्छिन्नप्रतियोगिताकत्वविकिंचिदनुयोगिक्त्वोभ
याभावस्तत्संबंधेन तद्धर्मान्यधर्मान्यधर्मवत्वं न वक्तुं शक्यते ताद्यशवाप्रतियोगितावच्छेदकसंबंधेनव
चाश्च न प्रतियोगिव्यधिकरणावीयकेवलान्वयितावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकधर्मव
त्वरूपत्वस्यकेवलान्वयितावच्छेदकसंबंधेनप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्वस्
पत्वस्यागगनादेस्तकेवलान्वयित्वापत्तेर्वारणायकेवलान्वयितावच्छेदकसंबंधेन उभयाभाव
गर्भप्रतियोगिवैयधिकरण्यप्रवेशप्रयुक्ताधिकाराणां निक्षेपरमणीयत्वाप्यत्र प्रतियोगितायां केवला
न्वयितावच्छेदकसंबंधकत्वस्य फलमुन्नास्यतेतः स्वप्रतियोगितावच्छेदकसंबंधेन यत्किंचिदधिकरणाना
वृतितानवच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वं दर्शितं। नन्वेवं किंचिन्निरूपितवृत्तित्वसामान्यप्रतियो

गदि० १६५ गितावच्छेदकसंबंधावच्छिन्नत्वयद्धर्मावच्छिन्नसोन्तोभयाभावः तद्धर्मावच्छिन्नप्रतियोगिताकत्वरूपे
तेन सत्तापानुसमवायेन केवलान्वयित्वं। एवं च तद्धर्मावच्छिन्नप्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्सं
बंधावच्छिन्नत्वोभयाभाववत्तेन संबंधेन तद्धर्माव॥ च्छिन्नत्वं तेन संबंधेन केवलान्वयिविशिष्टत्वमिति विवक्षितं
तेन स्ववृत्तिसमवेतत्वादिसंबंधेन ज्ञानत्वादेः केवलान्वयित्वेपि तेनापि न क्षतिरिति ध्येयं। येन संबंधे
नेति। समवायसंबंधेन घटत्वाभावाभाववत्त्वस्य घटत्वव्यक्ते ज्ञानस्य कालिकसंबंधावच्छिन्नप्रतियोगिता
कघटत्वाभाववत्ताज्ञानप्रतिबंधकत्वपाने घटत्वरूपाभावस्याव्याप्तिरिति भावः। केवलान्वयिनः कालि
कसंबंधावच्छिन्नाभावस्य केवलान्वयित्वासंग्रहः स्यादित्यत इति। ननु समानप्रकारतामात्रेणाप्रतिबंधकत्वे
ष्टं साध्याभाववद्विशेष्यकारकज्ञानप्रतिष्टं साध्यवद्बुद्धिनिरूप्यत्वेन प्रतिबंधकतायां प्रकारतासाम्यं
तद्धर्मावच्छिन्नविशेष्यतानिरूपितत्वे सति तद्धर्मावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्नाभावत्वान लप०
वच्छिन्नप्रकारतात्वेन वाच्यं। न चैवं घटाभावत्वाद्यवच्छिन्नप्रकारतायाः कालिकादिसंबंधावच्छिन्नत्ववद्ध १६५

ऽत्वादिप्रकारताया असाध्यापत्तिरिति वाच्यं तादात्म्यत्वनिरूपितप्रकारतात्वसमानसंबंधेन तद्धर्मावच्छि-
न्नप्रकारताविशिष्टत्वेन विशेषणीयत्वात् तादात्म्यसंबंधनिष्ठप्रतियोगिताप्रकारताघटकसंबंधत्वघटितविशेषिता-
घटकसंबंधावच्छिन्नाद्वितीयसंबंधघटकप्रकारतानिरूपिता स्वावच्छिन्नेयत्संबंधावच्छिन्नप्रकारतात्वस्वा-
वच्छिन्नप्रकारतानिरूपितत्वसंबंधत्वघटितविशेषिताघटकसंबंधावच्छिन्नप्रकारतात्वमानतरसंबंधेन तद्धर्म-
वत्त्वमिति नि॰। लिंते विशिष्टसंयोगत्वदैशिकविशेषणतात्वादिना वा संबंधो निवेश्यः। अनत्यावृत्तसाध्या-
भाववृत्तित्वानीयसाध्याभाववृत्तिविशेष्यतायाः प्रतिबध्यतावच्छेदकत्व। एवं चैतन्मते प्रकारतात्वादिरूपवि-
शिष्टधर्मानुगमयतेतद्धर्मावच्छिन्नविषयतानिरूपितत्वसमानेतद्धर्मावच्छिन्नविषयतानिरूपिताभावत्वा-
नवच्छिन्नविषयतान्यविषयतासाम्यवाच्यं दोषप्र॰। एवं तत्र पक्षेऽदं साध्यवदन्यसाध्य। अत्र साध्यं तदादि-
दंसाध्यं वच्चविनिर्तानवननुरूपसाधारणतां चैवसाध्येऽदंसाध्यमपि दंवत्साध्येऽदं तद्वासाध्यमिदंवत्त्वं-
तितानवननुरूपसाधारणानपीतात्र यमसंगइति निवेश्यं। तद्धर्मावच्छिन्नविषयतानिरूपिततद्धर्मावच्छिन्न

गा॰ १६६

विषयताशालित्वनिरूप्यत्वेन प्रतिबंधकतानं तेनैकस्यां विषयतायां तत्संबंधानवच्छिन्नप्रकारतानिरूपितत्वं अ-
मुष्यां तस्यां तत्संबंधावच्छिन्नाधेयतासंबंधावच्छिन्नप्रकारतात्वं निवेश्यं। तद्धर्मावच्छिन्नविषयतानिरूपि-
तवैशिष्ट्यावगाहितासंबंधावच्छिन्नाभावप्रकारतानिरूपिततद्धर्मावच्छिन्नविषयताशालितावत्त्वेन पक्षः सा-
ध्याभाववान् साध्यव्याप्याभाववद्वृत्तिहेतुर्नयोः प्रतिबंधकता। प्रथमविषयतायां तत्संबंधावच्छिन्नतद्धर्मावच्छिन्न-
प्रतियोगितासंबंधानवच्छिन्नप्रकारतात्वं। द्वितीयस्यां च तत्संबंधावच्छिन्नाधेयतासंबंधावच्छिन्नतद्धर्मावच्छि-
न्नप्रतियोगितासंबंधानवच्छिन्नप्रकारतात्वं निवेश्यं एवमेव पक्षे साध्याभावः साध्यव्याप्याभाव इति ता-
नयोः साध्यं पक्षनिष्ठाभावप्रतियोगितावेति संग्रहस्तु जातिविशेषत्वादिनेति अथ व्याव-
च्छिन्नव्यापकतावच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यावच्छिन्नत्वं स्वनिष्ठावच्छेदकतानिरूपकहेतुनि-
ष्ठावच्छेदकतानिरूपकाधिकरणतानिष्ठावच्छेदकत्वनिरूपकाधेयतानिष्ठावच्छेदकावच्छेदकतानिष्ठावच्छेद-
कतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिष्ठावच्छेदकतानिरूपकवह्नित्वनिष्ठाव- राम॰ १६६
च्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकवह्नित्वनिष्ठावच्छेदकतानिरूपकवह्नितेन मन्।

निष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकाधेयतानिष्ठावच्छेदकतानिरूपकत्वं
तत्र धूमसमानाधिकरणत्वघटाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणधूम
त्वान्यत्वं तत् इति ज्ञानवारणायाधेयत्वनिष्ठावच्छेदकतायां स्वनिरूपकावच्छेदकतानिरूपकत्वसं
बंधेनाभाववन्निष्ठावच्छेदकत्वान्यावच्छेदकताविशिष्टान्यत्वं निवेश्यानीमं नीलधूमसमानाधि
करणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणधूमवानित्यादिज्ञानवार
णाय स्वनिष्ठावच्छेदकतायां निरवच्छिन्नत्वे सति स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेनावच्छे
दकताविशिष्टान्यत्वं निवेश्यं तेन जातिविशेषवह्न्यापकेत्यादिज्ञानस्यापि वारणं अथवा निरवच्छि
न्नस्वनिष्ठावच्छेदकत्वाभावच्छेदकतानिरूपकत्वं हेतुनिष्ठावच्छेदकतायां निवेश्यं हेतुनिष्ठत्वाधि
करणनिष्ठत्वादेर्न निवेशः स्वाधेयतात्वाद्यवच्छिन्नत्वस्यैव निवेशः सुधीभिरूह्य इति चेन्न । तथा ।

ग॰टी॰ १६७ २१४ मतिनीलधूमव्यापकवह्निमद्वृत्तिनीलधूमवान्जातिविशेषवद्व्यापकवह्निमद्वृत्तिजातिविशेषव
द्वानितिपरामर्शानां पृथक्हेतुत्वापत्त्यागौरवात्।नचसाध्याभाववद्वृत्तित्वस्यव्याप्तित्वेव्यभिचा
रज्ञानप्रतिबध्यत्वानुरोधेनपृथक्नीलधूमत्वादिपुरस्कारेणतत्तद्व्याप्तिप्रकारकपरामर्शानां हेतुत्व
पासाम्यमितिवाच्यं।एतदेवार्थेत्यादिनाशंक्यस्वयमेवसमाधास्यमानत्वात्।किंचिद्धर्मावच्छिन्न।
त्वनिवेशेगौरवादाहवस्तुतइति।निर्धर्मितेति।स्वव्यभिचारांशेधर्मितावच्छेदकानवगाहित्वद्विशि
ष्टवैशिष्ट्यनिश्चयेपिपक्षवृत्तिधूमःधूमत्वाव्यभिचारवानितिनिश्चयस्योपयोगित्वपाधूमत्वविशिष्ट
व्यभिचारग्रहदशायांचतदनुदयेनोक्तरीत्यातादृशविशिष्टवैशिष्ट्यावगाहिनिश्चयानुदयादितिभावः।
वह्निव्यभिचाराभावविशिष्टत्ववृत्तिकत्वरूपविशेषदर्शनविरोधितयापूर्वसंशयस्योत्तरसंशयप्रत्या। गम॰
नुकूल्यसूचनामोचितेत्युक्तं।।सर्वैरेवेतिपक्षतात्मग्रन्थोक्तरीतित्वस्तुनसर्वमतसिद्धेतिभावः।परंपरासंबंधाव १६७

लंबनेनास्वरसः।व्याप्यांतरनिरूपणानात्मकइति॥ अन्यथाव्याप्यांतरांशेपिसंशयत्वापत्तेरितिभावः।
धूमत्वाद्यवच्छिन्नाभाववद्व्याप्यत्वावच्छिन्नाभाववद्भासकौदोषौविभिन्नावेवेतिबोध्यं।नीलपर्वतोवह्निमान्
पर्वतोवह्न्यभाववानित्यादौविशेष्यतयोरभेदासंभवेपिअवच्छेद्यावच्छेदकभावउपपत्तेर्बाधकाभा
वादितिमतांतरस्यानुपपत्तिसंशयेइति।एकवाक्यतेतितत्संयोज्यविषयतायाः साक्षात्परंपरयावाप्रयो
जिकायाविषयतायास्तत्संयोजकत्वंतदेकवाक्यत्वंननुघटस्तदभाववद्भूतलमित्यादिवाक्येघटस्यतदभा
वस्यचरतदभावोइतीतरेतरद्वंद्वेतदुत्तरमतुवर्थाधिकरणोलुप्तमत्वर्थोद्वित्वविशिष्टस्यैवतदुभयस्यान्व
यउपपत्ते।एवंसमाहारद्वंद्वेपिसमाहारसंज्ञावशात्प्रयोगस्यैकवचनांतत्वेपितत्समुदायत्वस्यमत्वर्थ
तयाभानस्यपाणिपादंवादयेत्यादौक्लृप्तत्वात्।समासस्यैवहिंसाहिंस्येलक्षणाच्छाकरेनिराक्रियतेन
तुमत्वर्थद्वित्वादिभानं।एवंचैकद्वित्व विषयताभादायैकवाक्यतायाउपपत्तेस्वच्छेदावच्छेदकभा

ग०टी० १६९ २१२

वानापन्नविशेष्यताद्वयनिरूपकतापत्तत्रोपगमसंभवात्तन्निश्चयत्वानुपपत्तिरित्यतआह दिगिति। दि
गर्थस्तु पन्नैकएवशब्दः भावाभावोभयवाचकः अरिष्टादिः अरिष्टेतुशुभाशुभेइत्यमरात् तत्राऽरिष्टवत्कु
भित्यादौकथमपिद्वित्वभानासंभवात्तन्निश्चयत्वानुपपत्तिरिति। नचसकृदुच्चरितेनेतिव्युत्पत्तिविरोधः
तस्यास्तात्पर्यविशेषविरहस्थलीयत्वात्। किंचविशेष्यतयोरवच्छेद्यावच्छेदकभावेमानाभावः
यतः प्रकारितयोः अवच्छेद्यावच्छेदकभावमतेभूतलंघटंसंदेहनीत्यादौज्ञानविशेष्यतापन्न
भूतलविशेष्यकत्वावच्छिन्नघटप्रकारितायाः अवच्छिन्नत्वसंबंधेनघटाभावप्रकारिताविशिष्ट
ज्ञानैकदेशप्रकारितायामप्यन्वयः। समभिव्याहृतपदार्थतावच्छेदकावच्छिन्नाभावप्रकारिताविशि
ष्टज्ञानस्यसंदेहपदार्थत्वात्। विशेष्यतयोरवच्छेद्यावच्छेदकभावमतेचदर्शितसंदेहपदार्थघटक राम० १६९
प्रकारतायांघटप्रकारतानिरूपितविशेष्यत्वावच्छिन्नविशेष्यतानिरूपितत्वान्वयोवाच्यः तत्रै

दर्शार्थेऽनुशासनाभावः। नच भूतलपदोत्तरसप्तम्या विशेष्यत्वमर्थः। विभक्त्यर्थे विभक्त्यर्थान्वयस्य
व्युत्पन्नत्वात्तस्मिन्नेव तत्त्वान्वयाभावाच्चेति। दर्शितमतद्वयं प्रकारान्तरेणाह विषयतामतमाह भावद्वयेति।।
स्वाभावप्रकारत्वानिरूपितत्वादिनेति। स्वादिनाऽभावप्रकारकविषयतानवच्छिन्नत्वपरिग्रहः। स्वेति
प्रसंगः वह्निव्याप्यधूमवान् जलवांश्चेति ज्ञानस्य कारणतापत्तिः। भावद्वयकोटिकत्वेऽस्त्विः। धूमत्वा
वच्छिन्नाभावकोटिकसंशयात्मकव्याप्यवत्तानिश्चयोपगमेऽस्वरसात्। धूमत्वावच्छिन्नाभावादिकोटि
कसंशयेषु व्याप्यतावच्छिन्नाभावादिकोटिकत्वमनंगीकुर्वतामनुरोधेनाहेदंत्विति। संशयत्वस्य ज्ञानि
विशेषत्वमतमनुरुध्यानस्त्वाह संशयत्वेवेति। वाकारेणास्थापां चाक्षुषत्वादिना सांकर्यवारणाय मान
सत्वव्याप्येति। सहकारितायाइति। प्रथमपरामर्शेऽप्रामाण्यज्ञानसत्वेद्वितीयपरामर्शोत्तरनाशएवानुमि
तिरितिभावः। तत्तद्विषयतासंबंधेनस्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वनिष्ठप्रकारतानिरूपितत्वा

ग०टी० १७० ७७६ वच्छिन्नप्रकारतानिरूपितविषयताविशेषसंबंधेन· धूमादिप्रकारतानुपादानेदोषमाह आलोकादी
ति। इदंज्ञानं धूमाभाववति धूमप्रकारकं धूमाभाववति आलोकप्रकारकंचेतिग्रहे इत्यर्थः। आलोक
त्वावच्छिन्नप्रकारतात्मकविशेष्यतासंबंधेन प्रामाण्यग्रहविशिष्टत्वात् प्रथमप्रकारतानिरूपितत्वा
त् धूमत्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वनिष्ठप्रकारतानिरूपितत्वाद्वितीयं तत्तद्ज्ञानभेदे
पि विषयतैक्यपक्षे इदं ज्ञानभेदेन विषयताभेदमतेनाह वस्तुतस्त्विति। विनिरूपके इति आलोकाभा
ववद्वृत्तित्वभ्रमत्वज्ञानविशिष्टात्पुरुषांतरीयधूमाभाववद्वृत्तित्वभ्रमत्वज्ञानविशिष्टात्तत्पुरुषीयधूमप
रामर्शात् धर्मिकधूमाभाववद्वृत्तित्वभ्रमत्वज्ञानकालीनात्त्व धूमपरामर्शादनुमितिः क्रमेणफलद्वैविध्यं ज्ञा
नभेदेपि विषयतायाएकत्वेतुप्रकृतविशेष्यतानिरूपितव्याप्यत्वावच्छिन्नप्रकारताकनिश्चयत्वेनानुमि राम०
तिहेतुत्वे प्रकारताकत्वंच व्याप्यत्वधर्मितावच्छेदकीयः स्वावच्छेदको धर्मः तद्विशिष्टप्रकारतानि १७०

रूपितविशेष्यतासामानाधिकरण्योभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्वनिरू-
पकत्वोभयसंबंधेन। वैशिष्ट्यं च प्रकारतायां स्वावच्छिन्नाभाववद्वृत्तिविशेष्यतानिरूपितत्वाव-
च्छिन्नत्वस्वावच्छिन्नप्रकारतात्वावच्छिन्नत्वोभयसंबंधेनेति दिक्। केचिदिन्मस्वरसः परंपरापाः सं-
बंधत्वावलंबनात्। अप्रामाण्यग्रहस्य सत्त्वे इति भ्रमत्वघटकधूमत्वावच्छिन्नाभाववत्ताज्ञानस्य व्याप्य-
त्वावच्छिन्नाभावसंशयसामग्रीत्वात् तादृशधूमत्वावच्छिन्नाभावस्य साध्यतदभावसहचरितत्वात्।
पक्षे अप्रामाण्यग्रहे धूमपरामर्शे विरोधितया अयं सारणं बोध्यं। संशयस्येति व्याप्यत्वावच्छिन्नप्र-
कारकविषयतापर्यव्याप्यत्वावच्छिन्नाभाववद्धर्मिनिष्ठत्वसंशयस्येत्यर्थः॥ तत्र विशेषणासंदेहविरहविशि-
ष्टविशेष्यसंबंधज्ञानरूपप्रतिबंधकस्य विशेषणासंदेहेण परासारणादिति भावः। व्याप्याभावसंशय-
स्य साधारणधर्मदर्शनादिजन्यतया न तदसत्त्वे संदेहासत्त्वसूचनाय प्राप्यशङ्केति। यद्विचोदासीनधूमत्वा-

ग० टी० वच्छिन्नाभाववद्वृत्तित्वभ्रमत्वज्ञानाभावापेक्षायामप्यागृहीतत्वेन तदप्याह यत्साध्यपक्षकेति साध्य
७१ संबंधत्वमेवेति। न च व्यापकताघटकसंबंधत्वमेव तथा वाच्यमिति वाच्यं पर्वतो वह्निमानिति साध्य
२१२ तावच्छेदकविशिष्टवैशिष्ट्यानुमित्यनुरोधेन तस्यारित्यागात्। तत्र केवलसंबंधस्यैव प्रतियोगि
तावच्छेदकत्वादन्यथा परामर्शस्य भ्रमत्वापत्तेः। पक्षसंबंधावच्छिन्नवृत्तेरिति हेतुतावच्छेदकसं
बंधस्य हेतुप्रतियोगिकसंबंधातिरिक्तसंबंधावच्छिन्नवृत्तित्वनिवेशपक्षे गतिस्थिंमा। व्यापकताप
रामर्शेति। तथा चोक्तं पर्वतो वह्निव्याप्यधूमवानपाषाणमयस्तुपाषाणमयावृत्तिश्च वह्निरिति।
ज्ञानेन तुल्ययोगक्षेमपर्वतवृत्तिधूमव्यापको वह्निर्धूमवद्वृत्तिश्चेति ज्ञानमि। विशिष्टवह्नित्व।
स्य गुरुतया तदवच्छिन्नाभावासत्त्वाद्धूममहानसीयत्वादीति। विवक्षणेऽवृत्तिमहानसीयत्ववह्नि। ग०म०
त्वोभयत्वावच्छेदेन प्रतियोगितावच्छेदकत्वपर्याप्त्युपगमेऽपि तादृशसंबंधावच्छिन्नतादृशाव ७१

च्छेदकत्वाभावः प्रतितियोग्यनवच्छेदेन वह्नित्वमात्रवृत्तिधर्मावच्छेदेन ननत्रोपेपत्तेर्मानाभा
वात्। प्रतियोगितानवच्छेदकेतिनञ्समासानुरोधादाह वह्नित्वादीति। वस्तुतस्तु गुरुधर्मस्य
प्रतियोगितावच्छेदकत्वमते सामानाधिकरण्यसंबंधेन महानसीयत्वविशिष्टवह्नित्वावच्छि
न्नाभावोऽपि प्रामाणिकः। एवं च विशिष्टवह्नित्वस्यावच्छेदकतापर्याप्त्यवच्छेदकतया केवल
वह्नित्वावच्छिन्नपर्याप्तेः तदनवच्छेदकत्वं दुर्वारं। पर्याप्त्यवच्छेदकतापर्याप्त्यधिकरणधर्मान
वच्छिन्नत्वनिवेशे तु प्रयासो यातः। एवं महानसीयवह्निभिन्नवह्निमान् धूमादित्यादावतिव्याप्ति
वारणाय साध्यतावच्छेदकतापर्याप्त्यधिकरणेनाश्रयविषयतापर्याप्त्यधिकरणत्वं वाच्यं त
था च गौरवमित्यत आह वह्नित्वादीति विशिष्टवह्नित्वावच्छिन्नप्रतियोगितायां महानसीयत्वा
त्वावच्छिन्नत्वमस्त्येव साक्षात्परंपरासाधारणावच्छेदकताया निरुक्तिघटकत्वात्प्रतियोगि

ग० टी० १७२

ताऽवच्छेदकतायां निरवच्छिन्नत्वनिवेशाद्वाऽदुर्वारत्वादिति विधेयताऽवच्छेदकतायद्धर्मावच्छिन्ने पर्या
प्ता तद्धर्मावच्छिन्नानुयोगिताकत्वं तु नाशावच्छेदकत्वाभावेन विशेषणं। पर्याप्त्यनवच्छेदकधर्माव
च्छेदेनावच्छेदकत्वाभावानुपगमे नैवोधयत्नो विशेषणानिवेशमहागौरवात्। न च प्रतियोगिताविशेष
णोपादाने गौरवं तस्याखण्डाभावसंपादकत्वात्। अप्रामाणिकपर्याप्त्यवच्छिन्नप्रतियोगिताकम।
प्रामाणिकाव्याप्यवृत्तिकमभावमुपेत्य विशेषणानिवेशमपेक्ष्य प्रतियोगिताविशेषणस्याव्यापकत्वा
द्वाऽदुर्वारेति। न च व्यभिचारधीप्रतिबंधकताश्रयज्ञानत्वेन कारणत्वं। आश्रयत्वं च स्वाश्रयत्वप्रकृतपक्ष
विशेष्यतानिरूपितहेतुविषयतानिरूपितसामानाधिकरण्यविषयतानिरूपितसाध्यविषयतानिरू
पितत्वावच्छेदकीभूतसाध्यताऽवच्छेदकविषयताशालित्वोभयसंबंधेनेति वाच्यं। परंपरायाः संबंधत्वा
नाऽऽश्रयत्वं तु धर्मत्वाभावेनेति। जात्यखंडोपाध्यन्यतरत्वं विशेष्यत्वानवच्छिन्नप्रकारत्वव्यापकमिति नियमा

रा०म० १७२

दिति भावः। नन्वथैवमयं घट इत्यादिव्यवसायविषये इदंत्वेन घटादिनिष्ठरूपाद्यात्मके व्यभिचारः। परन्तु विशे
ष्यत्वानवच्छिन्नप्रकारतायां धर्मितावच्छेदकताभिन्नत्वं विशेषणम्। इदंत्वं च धर्मितावच्छेदकमेवेति न व्यभि
चार इति तन्न। घटादेरपि धर्मितावच्छेदकतया स्वरूपतो भानप्रसंगादिति चेन्न। धर्मितावच्छेदकपुरोवर्ति
त्वादीति स व्यभिचारदर्शनात्। न चाखण्डधर्मात्मकं पुरोवर्तित्वं तत्त्वं वोपेत्य साक्षात्परंपरया वा स्वरूपतस्तज्ज्ञाने
विरोधात्। वस्तुतस्तु अत्र विहितैरिरित्यादौ चाक्षुषज्ञानमिवायं घट इत्यादौ ज्ञानमेव पुरोवर्तित्वरूपं तु विशे
षः। एकत्र चाक्षुषत्वेनान्यत्र ज्ञानत्वेनेति निरवच्छिन्नधर्मितावच्छेदकतायां मानाभाव एवं निरवशेषेन स्वस्व
रूपतः कुतो न भानम्। अत्र केचित्तु निरवच्छिन्नप्रकारतासंबंधेन ज्ञानत्वावच्छिन्नं प्रति निरवच्छिन्नविषय
तासंबंधेन ज्ञानत्वेन हेतुता। इदंत्वे व्यभिचारात्। किन्तु धर्मितावच्छेदकतान्यनिरवच्छिन्नप्रकारतासंबंधेन ज्ञान
त्वावच्छिन्नं प्रति तादृशसंबंधेन ज्ञानत्वेन हेतुतेत्याहुस्तदयुक्तं निरवच्छिन्नविषयताविरहप्रयोजकस्य तु।

ग०टी०
१७२
२०५

र्वत्वात्। यत्रोक्तसंबंधेन ज्ञानं प्रति सामानाधिकरण्यस्वनिष्ठसमवायसंबंधावच्छिन्नप्रतियोगिताकभेद
वत्त्वोभयसंबंधेन सत्त्वेन कारणत्वमिति तन्न। प्रकारत्वात्वादिस्वस्वखंडधर्मेषु समवायवृत्तिसामानाधिकरण्या
भावेन व्यभिचारितायाः कथंचित्सामानाधिकरण्यप्रवेशे कदाचिद्दृष्टाभावादेरपि स्वरूपतो भानप्रसंगात्।
वस्तुतस्तु स्वानवच्छिन्नप्रकारतासंभवेन ज्ञानं प्रति स्वखंडधर्मवत्त्वं प्रतिबंधकमिति सां। उक्तरूपेणेति। स्वस्व
थासिद्धत्वपेक्षाशयः। अविरुद्धमिति। अनन्यथासिद्धत्वोपगमादिति भावः। स्वयं ज्ञानवानिति सिद्धिदशायां
ज्ञानवानित्यनुमित्यनुदयात्तादृशानुमितिलोपप्रसक्तोऽसतीति। आदिना बाधविशेषपरिग्रहः। ननु दर्शित
स्थले फलवैषम्यमानुभविकं तदनुरोधेन चानवच्छेदकत्वज्ञानत्वतदुभयावच्छिन्नावच्छेदकताकनिरव
च्छिन्नज्ञानत्वनिष्ठावच्छेदकताकपरामर्शीयप्रकारतायाः एव निरवच्छिन्नविधेयतावच्छेदकताप्रयोज
कत्वमुपेयमित्यतस्त्वाह ज्ञानत्ववदिति। स्वानवच्छेदकत्वधर्मितावच्छेदकतापन्नज्ञानत्वेनावच्छिन्नेति। राम०
७३

विशेषितज्ञानत्वयोः परामर्शी यो यादृशधर्मितावच्छेदकप्रकारभावः तादृशं तमनुमनुत एव विधेयता
वच्छेदकत्वोपगमात् ज्ञानत्ववान् ज्ञानवानित्यनुमितिः । निर्विशेषितज्ञानत्वप्रकारकसविशेषितज्ञान
त्वप्रकारकविषयताभ्यां सविशेषितज्ञानत्वावच्छिन्नविधेयताप्रयोजकत्वात् ज्ञानत्वावच्छिन्नवानि
त्यनुमितिः निर्विशेषितज्ञानत्वप्रकारकभिन्नसविशेषितज्ञानत्वप्रकारकविषयतायां निर्विशेषितज्ञा
नत्वावच्छिन्नविधेयताप्रयोजकतया ज्ञानवानित्यनुमितिः । नन्वेकत्वद्वयमिति रीत्या विषयतयोर्नाभेदो
वच्छेद्यावच्छेदकभावो वेति वाच्यं तन्मतेऽपि साध्याधिकरणीयविषयताया ऐक्यादुरपह्नवेऽप्यन्यथा ज्ञानं
तादृशज्ञानत्वावच्छिन्नसमानाधिकरणं वा स्वेनाकारेणाप्रसंगात् । एवञ्च धर्मितावच्छेदकप्रकारभावमु
न्मुख्यत एव विधज्ञानत्वत्वावच्छिन्नावच्छेदकताकप्रकारतानिरूपितविशेष्यताकत्वं चिन्नप्रकारतैव त
त्प्रयोजिका वस्तुतस्तु धर्मितावच्छेदकप्रकारभावानापन्नस्वरूपतो ज्ञानत्वप्रकारितानतयेतिनकाविदस्तु

७

ग०टी० ७४ ८१० पपत्तिरितिसूक्ष्मविवेचनचतुराः॥स्वरूपतोपीति॥अवच्छेदकत्वांशेस्वरूपतोज्ञानत्वावगाहिपरामर्शाऽज्ञान
त्वानित्यनुमितिः॥तत्रज्ञानत्वत्वावच्छिन्नावगाहिनःज्ञानत्ववद्वह्निरितितात्पर्यः॥इत्यपिवदंतीत्यस्वरससूचनाय
॥स्वविशिष्टपरामर्शनिर्वाहायप्रतियोगितावृत्तित्वाद्वृत्यभावकत्वेनसाध्यतावच्छेदकनिवेशेवह्निबुद्धिःस्व
र्यविषयतायाजनकतावच्छेदकत्वस्वीकारापत्तिः॥अवच्छेदकत्वांशेस्वरूपतोजातिमानंव्याप्तिवादेस्वरूपतंव्य
भिचारज्ञानाविरोधितयाकारणत्वस्वीकारनएवनिर्मलस्त्वेति॥अत्रनव्यमतेव्याप्तिवादेदर्शितंवह्निमान्इत्यनुमि
तौप्रतियोगित्वाभावज्ञानमस्त्रेनकारणद्रव्यत्वेनप्रतियोगित्वाभावज्ञानादपितदापत्तेरित्यतोवह्नित्वेने
ति॥स्वरूपतोपीति॥स्वरूपतोज्ञानत्वत्वावच्छिन्नेऽप्रतियोगित्वज्ञानंज्ञानत्वत्वावच्छिन्नवत्प्रतियोगित्वज्ञानंच
क्रमेणज्ञानवान्ज्ञानत्ववत्वाभित्यनुमितौकारणंएवंचतद्वत्तात्वीयज्ञानभिन्नज्ञानवानस्त्वात्मत्वाद्वित्यादा रम० ७५
वपिव्याप्तिवारणं॥व्याप्तिवादेस्फुरीत्यावोध्यः॥सर्वसामंजस्यमिति॥नचप्रतियोगितायाअव्याप्यवृत्तित्वेहि

छिन्नमेवेतिवाच्यं। विशिष्टाभावविशेषानुरोधेनतद्व्याप्यवृत्तित्वस्यावश्यकत्वात्। नचव्यभिचारग्रहा
विरोधित्वं। भूतलंघटवदितिज्ञानप्रतिबंधेभूतलावृत्तिरितिज्ञानस्यैवव्यभिचारज्ञानेसाध्यंहेतुसमानाधि
करणाभावाप्रतियोगीतिज्ञानस्यप्रतिबंधकत्वावश्यकत्वात्। समानप्रकारत्वामतेव्यभिचारज्ञानाविरो
धित्वंचासरस्वीजं। अभावत्वावच्छेदेनेतिकेचित्तुनतुभावेवाच्यत्वाभाववानितिज्ञानस्याभावत्वावच्छे
देनवाच्यत्वाभावावगाहिनोऽभावत्वसामानाधिकरण्येनवाच्यत्वावगाहित्वपास्त्राहार्यत्वेनाप्रतिबंधक
त्वंतुवीरं। नचस्वरूपसंबंधावच्छिन्नवाच्यत्वावच्छिन्नप्रतियोगितायाःप्रतियोगितावच्छेदकसंबंधतया
तेनसंबंधेनाभावेवाच्यत्वस्याभानान्नाहार्यत्वमितिवाच्यं। प्रतियोगितायाःस्वरूपसंबंधत्वयात्तादृशप्रति
योगितासंबंधावच्छिन्नप्रतियोगितायांस्वरूपसंबंधावच्छिन्नप्रतियोगितात्वाभाघातादित्याहुः। अनुयोगिता
यामेवप्रतियोगिनोभानंनाभावइतिमतांतरमाह। अनुयोगितात्वावच्छेदेनेति। प्रकारत्वेइतिअनयानुपपत्त

ग०टी० रितासत्त्वेनेतिभावः।विरोधग्रंथेइति।पक्षपिसंसर्गसंसर्गतावच्छेदकाभावग्रहस्यविरोधित्वस्यवाव्यत्तयाप्र
७५ तियोगिताकाव्यत्वत्वानवच्छिन्नेतिज्ञानस्यैवविरोधित्वसंभवाद्विषमितादिसाधारणैकप्रतियोगिकत्व
व्यवस्थापनं व्यर्थं तथाप्यवच्छेदकतायाएकतानीयत्वं विनाऽगतिः स्यात्तत्प्रतियोगितायास्तथात्वं।
१३० विनानेतितद्दोषोद्धारकांशावच्छेदकतावाव्यत्वत्वावृत्तिरितिज्ञानं च न प्रमाऽवच्छेदकतायामाधेयतासंबं।
धेनवाव्यत्वत्वज्ञानेच्च वाव्यत्वत्वावृत्तित्वत्वावच्छिन्नाभावज्ञानं न विरोधिग्राह्याभावानवगाहित्वात्तद्वृसं।
नियामकाधेयतासंबंधावच्छिन्नप्रतियोगिताभावात्।नजुशिरोमणिप्रदर्शितसिद्धांतानुरोधेना।
हृतदीयत्वसहितानुयोगितेति।केवलतदीयत्वादिनैतितदीयेकिंतत्स्यास्तीत्यायाकारकज्ञानमित्य
र्थः।अनुमितमनुपपत्तेरितिअथाभावांशेएकत्वद्वयमितिअभावत्वतदीयत्वोभयावगाहिसाध्याभाव रत्न०
वदवृत्तिरित्याकारकस्यकेवलान्वयित्वग्रहानिवर्त्तनीयत्वाभ्युपगमे हेतोः संभवान्नदोषइतिचेन्न।पक्षेनिर्व ७८

र्मितावच्छेदककत्वज्ञानज्ञानं प्रतित्वाद्वृत्तित्वज्ञानं प्रतिबंधकं स्यात् एवासिद्धिग्रंथे साध्यनिष्ठावृत्तित्वस्य नि
र्धर्मितावच्छेदकव्याप्तिवृत्तिकसाध्यसामानाधिकरण्यज्ञानविरोधिज्ञानविषयतया व्याप्यत्वासिद्धत्वं
दीधितिकृद्भिरुपेतव्यं । एवं च साध्यप्रतियोगितासंबंधेनावृत्तित्वज्ञानकाले साध्यीयवद्वृत्तित्वज्ञानम
पि दुर्धरमेवेति । विशिष्टव्यापकताविरहव्यावर्तकेति तथा च विशेष्यव्यापकताग्राहकसामग्री विशेषणो
पस्थितिकाले विशिष्टव्यापकतां निष्प्रत्यूहमुपनयति तत्र विशिष्टाव्यापकत्वविरुद्धत्वस्य विशेष्यव्यापकतायां स
त्वेन तद्ग्रहस्यैव तद्ग्राहकसामग्र्या व्यापिततया विशिष्टाव्यापकत्वग्रहविरोधित्वादिति भावः । विशेष्ययोः सहचार
ज्ञानं तत्र तद्वृत्तित्वज्ञानसहिततत्समानाधिकरणाभावप्रतियोगित्वज्ञानरूपप्रतिबंधकत्वाभावव्या
प्तिन सामग्रीबोध्या । प्रकारांतरमाह यद्वेत्यादि दीधितिं खंडयति इदमत्रेति । ईश्वरीयेत्युपादानप्रतियोगिवैय
धिकरण्यावृत्तिव्यापकतावच्छेदकतानिर्वाहार्थं तेन तद्वृत्तिव्यापकतावच्छेदकतायाः सर्वविषयकज्ञान

६

ग०टी० ७८

प्रमाण्यांसत्त्वेपिनक्षतिःव्यतिरेकिहेतौरेतद्व्यापकताद्वयंयथापथंउभयत्रसुतरामस्त्येवप्रमाविशेषेप्रतियोगि
वैयधिकरण्यघटितमधिकमप्याहव्यतीति।हेतुमघावद्विषयकेतितद्व्यक्तित्वेनप्रमायाःसाध्यतावच्छेदकत्वे
लाभायान्यतमेति।तद्व्यक्तिरेवलिंगं।असर्वविषयकान्यप्रमायास्त्वेतिपाद्यंतं।प्रागस्याधिकरणधर्मावच्छि
न्नाभावप्रामाणिकतायाउक्तत्वात्तन्मतेकेवलान्वय्यनुमानस्यसाध्याभाववद्वृत्तित्वस्यव्याप्तित्वेपिनिष्प्र
त्यूहतामाहव्यधिकरणेति।दुर्वारत्वादिति।अत्रतादृशाभावसिद्धौयथाश्रुतमिश्रलक्षणादूषणासंगतिरिति
नशंक्यं।तादृशाभावानुपगमेपितादृशभेदमादायतस्यव्यधिकरणधर्मावच्छिन्नाभावाभिन्नत्वेनसाध्याभाव
सजात्यसंभवात्मेयत्वेनप्रतियोगितावच्छेदकत्वस्याक्षततपातद्दोषतादवस्थ्यात्तस्मात्स्वमतानुसारेणो
दंदूषणमिति।लक्षणासमन्वयादिति।एवंसत्तावान्समवेतादित्यादौसमवायेनहेतावपितल्लक्षणसमन्वयोवो गम० ७६
ध्यः।आकुंतिमरुचिर्वीजंचप्रथमेवाच्यंप्रमेयादित्यादौहेतुव्यक्तिभेदेनव्याप्तिभेदः।द्वितीयेविशेषधर्मावच्छि

न्नाधेयताकूटस्यैवसामान्यधर्मावच्छिन्नत्वेऽव्याप्तिः तृतीयेचमेमादेर्हेतुतावच्छेदकत्वेऽव्याप्तिरिति।केचित्ति
त्तिकृत्स्ननियामकपरंपरायाअनुसरणमस्वरसः।अनुव्यवसायबलादपीति।अनुव्यवसायस्यानादरेव्याप्य
वत्तानिर्णयाधीनप्रत्यक्षात्मकसाध्यनिर्णयादेवप्रवृत्त्यादिफलनिर्वाहसंभवादनुमितेरप्युच्छेदापत्तेः।अपि
नादर्शितप्रतिबंधादिसमुच्चयः।अनुभवानुरोधएववायथाभिन्नेविषयेऽनुमितिसामग्र्याःगुरुशरीरायथासमानविष
येशाब्दबोधसामग्रीप्रत्यक्षसामग्रीवा।त्वंबलवत्सामग्री।उत्तेजकंदुर्बलसामग्रीफलेच्छा।विदुर्बलसामग्री।तयो
रेवेतिसमनियताभावैक्येनोत्तेजकाभावएकएवेत्याशयः।अत्रेच्छाविरहविशिष्टेच्छायाउत्तेजकत्वेसमनियता
भावैक्येपीच्छाविरहविशिष्टेच्छात्वावच्छिन्नप्रतियोगिताकत्वेनेच्छाविशिष्टेच्छाविरहत्वावच्छिन्नप्रतियोगिता
कत्वेनच्चतस्यकारणांतरैस्वविनिगमनाविरहोदुर्वारइतिकारणतानंततोपिवाहुल्यमितिकल्पांतरमाहवस्तुत
इति।इच्छा।दुर्बलसामग्रीफलेच्छा।एकत्रनिवेशइति।दुर्बलसामग्र्यामिच्छामात्रनिवेशेउभयदिशीच्छास

ग०टी० २२२ २९१

सत्त्वेवलवत्सामग्रीफलप्रतिबंधायत्तिः।तद्विरहमात्रनिवेशेउभयदिशीच्छोपाश्रसत्त्वेनतदापत्तिरतइतिशे
षः।दिगर्यस्तुवह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवान्पर्वतोवह्निमानितिप्रत्यक्षेच्छाविशिष्टतत्साम
ग्र्याःपर्वतोवह्निमानित्यनुमितौप्रतिबंधकत्वेनकल्पनेतदानींव्यतिरेकव्याप्तिविशिष्टपरामर्शरूपार्था।
पत्तिसामग्रीसत्त्वेनतदभाववद्वृत्तितानुमितिसामग्र्याश्चसत्त्वादेवानुमितिवारणासंभवात्।नचार्थापत्तित्वस्या
नुमितित्वव्याप्यत्वमतेपिवह्न्यभाववद्वृत्तिधूमवान्पर्वतोवह्निमानितिप्रत्यक्षसामग्र्याइच्छाविशिष्टायाः
पर्वतोवह्निमानित्यर्थापत्तौप्रतिबंधकत्वेनकल्पनीयंतदानीमन्वयव्याप्तिविशिष्टपरामर्शरूपानुमि
तिसामग्रीसत्त्वेनतदभाववद्वृत्तितार्थापत्तिसामग्र्याश्चसत्त्वादेवार्थापत्तिवारणासंभवादितिवाच्यं।तद्विम
वन्मतेऽर्थापत्तिंप्रतिव्यतिरेकव्याप्तिविशिष्टधर्मितावच्छेदककभिन्नविषयकप्रत्यक्षेच्छावृत्तिनेन ग्या० ८७
दृशप्रत्यक्षसामग्र्याःगुरुशरीरायाःप्रतिबंधकत्वापत्तगौरवादिति।इत्याशयेनेति।यद्यपितल्लिंगक

तत्पक्षकत्वत्साध्यकानुमितित्वावच्छिन्नं प्रति तथाविधानुमितीच्छाविरहविशिष्टसिद्ध्यभावस्य जनक
त्वे विशिष्टजन्यतावच्छेदकप्रयोजकतयैव तद्घटकानुमितित्वप्रयोजकत्वं त्वननुगतपक्षताजन्यत्व
स्य दुर्वारं तथापि यद्यर्थापत्तिरूपानुमितिं प्रति सिद्धेः प्रतिबंधकत्वमुपेयते ऽर्थापत्तित्वप्रकारकेच्छाधी
नानुमितौ व्यभिचारवारणायानुमित्साविरहविशिष्टसिद्ध्यभावजन्यतावच्छेदककोटौ ऽर्थापत्त्यसत्त्वं नि
वेश्यते ऽर्थापत्तित्वप्रकारकेच्छासाधारणरूपेणानुमित्साया उत्तेजकत्वे तादृशेच्छाकाले व्यतिरेकि
परामर्शसत्त्वे सिद्धिसत्त्वे ऽनुमित्यापत्तेः। व्यतिरेकिपरामर्शविशिष्टार्थापत्तित्वप्रकारकेच्छात्वापि परामृ
शविशिष्टानुमितित्वप्रकारकेच्छयोरुभयस्याप्युत्तेजकत्वे महागौरवापत्तेः। लाघवेनार्थापत्तिप्रति ऽर्था
पत्तित्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावस्य हेतुत्वमुच्यते तदेदं दूषणं। वस्तुतस्तु तल्लिङ्गकत्वपक्ष
कत्वत्साध्यकार्थापत्तित्वं पक्षताकार्यतावच्छेदकमेव नोपेयमते इति पक्षताकार्यत्वमर्थापत्तित्वे ऽप्रयो

ग०टी० ७८ ८१४

जकत्वमेवाभवतोत्वचपिलिंगकानुमितिंप्रतीवव्यतिरेकिलिंगकानुमितिंप्रत्यपितथाविषपक्षता
याः कारणतयानुमितित्वेऽर्थापत्तित्वेचप्रयोजकत्वापत्तिरितिगौरवमिति। आहुरित्यस्वरसोद्भावनं
तत्रव्याप्तिज्ञानस्यप्रमत्वमेवोपेयंनतुवृत्तितानारकल्पनं। स्वाधिकरणावृत्तिसाध्याभावाधिकरणता
कत्वेनावाच्यंतत्रचनोक्तदोषलेशोपीतिप्रागुक्तमिति॥ ॥छ॥ ॥इतिकेवलान्वयिग्रंथः॥ ॥
॥छ॥ ॥छ॥ स्वपरामर्शग्रंथेसाध्यवदन्यावृत्तित्वादेरन्वयव्याप्तित्वव्यवहारतेनैतावतानस्येदृशाभू
ताभिप्रायकतासंभवः तस्यव्याप्तितापाएवतन्मते। सत्वादतआहवस्तुतस्त्विति। विरोधेनेति। साध्यसा
ध्यवदन्यवृत्तीतिज्ञानमाहार्यंनसंभवतिसाध्यवद्भेदसामानाधिकरण्यप्रकारकानाहार्यज्ञानंप्रति
साध्यवृत्तिविषयतावत्वेनविरोधित्वात्आहार्यंत्वविरोधीतिभावः। उपस्थितमानानियमेनेतिउप राम० ७८
स्थितासंसाऽग्रहदेः संभवादितिभावः इतिसूचनायेति। एतद्दूषणसूचनायेत्यर्थः। इतिदोषमुद्धर्तुमि

तिपावन्न्। पर्यवसितार्थ इति यद्यपि साध्यतावच्छेदकावच्छिन्नानधिकरणत्वव्यापकतावच्छे
दकस्यावच्छिन्नानधिकरणतात्वकधर्मवत्त्वमेवभेदस्याव्याप्यवृत्तित्वमतेसुवचं तथापि साध्याभावव्या
पकतायाहेत्वभावेशलाभार्थं तथाभिधानं अन्यथा तद्विषयकज्ञानस्याकारणत्वापत्तेरिति। यद्या
पि घटपटोभयं घटपटान्यतरत्वात् घटे पटे पटोभयत्वादित्यादावव्याप्तिवाशोऽभयत्वाभाववत्त्वभेदयोः
सर्वमतेऽव्याप्यवृत्तित्वात्तथापि पुत्रस्वरूपसंबंधेन साध्यानधिकरणत्वस्यान्तस्यपलीपव्याप्तौ निवेशानी।
पत्वात्तेन न दोषः। साध्याद्यसामानाधिकरण्यरूपेति। इदं तु बोध्यं अत्रांतस्यपथा संयोगादिसाध्यकद्रव्यत्वहेतु
कानुमितिनिर्वाहाय साध्यवैयधिकरण्यरूपविशेषणावच्छिन्नसाध्याभावव्यापकतानुमित्यौपयिकी
न तथा तद्विशेषणानवच्छिन्नतद्व्यापकतापि तादृशी अन्यथा गुणत्वाद्यभावे संयोगादिव्यापकताज्ञानाद्गु
णादौ गुणत्वादिना संयोगाद्यभावानुमितिप्रसंगात् हेतुवैयधिकरण्याविशेषितहेत्वभाववन्निष्ठसाध्याभाव

ग०टी० ७७८ व्यापकतानुनतादृशीन्द्रियांतस्पर्शसंयोगादिरूपव्यतिरेकिहेतुनाऽऽत्मत्वपृथिवीत्वाद्यनुमित्यापत्तेर्दर्शित
त्वादिति। तत्र विभागोत्पत्तिक्षणेऽभासमान इति साधनाभावः साध्याभावव्यापक इति विशेषितत्वज्ञानस्यापि
[illegible] कारणत्वार्थं साधनाभावाभाववान्तत्प्रतियोगियोगिसाधनवान्निरपेक्षेनरपक्षधर्मताज्ञानस्य सहका
रित्वार्थमाह तत्प्रतियोगितयावेति। ननु साध्याभावाभावस्य साधनादिति मूलाद्व्यतिरेकिपरामर्शजन्यानु
मितेः पर्वतो वह्न्यभावाभाववानित्याकारकत्वप्रतीपत्तेर्युक्तत्वेन तत्तथाविधत्वेपि पर्वतो वह्निमानेवेति सं
शयनिवृत्तिसंभवात् तादृशानुमितेः पर्वतो वह्निमानित्याकारकत्वेऽप्यपरामर्शव्यभिचारवारणार्थं
कारणताव्यवहितोत्तरत्वस्य निवेश्यत्वगौरवात्संमन्नु तत्त्ववह्न्यनुमितिस्वीकारे सिद्धिप्रतिबंधकतायां परम
र्शविशिष्टेच्छानाधुत्तेजकतामतेऽप्यपरामर्शविशिष्टेच्छाव्यतिरेकिपरामर्शविशिष्टेच्छयोर्द्वयोरुत्तेज रामं०
कत्वे मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण गौरवमिति तत्तद्वह्न्यभावाभाववदनुमितिस्वीका २५८

रेसिद्धिप्रतिबंधकतायां परामर्शविशिष्टेच्छानामुत्तेजकतामते ऽन्वयिपरामर्शविशिष्टेच्छाव्यतिरेकिपराम
र्शविशिष्टेच्छयोर्द्वयोरुत्तेजकत्वे मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण गौरवमिति तत्र वह्न्यभावा
भावानुमितित्स्वीकारे ऽपि तत्र सिद्धिप्रतिबंधकतायां वह्न्यभावाभाववत्साध्यकान्वयव्याप्तिव्यतिरेकव्याप्तिविष
यकपरामर्शद्वयान्यतरविशिष्टेच्छयोरुत्तेजकतया साम्यात्। न च तत्र वह्न्यभावाभावानुमितित्स्वीकारे ऽस्त्व
भावो न वह्नीयत्वेतिबाधबुद्धेः प्रतिबंधकत्वकल्पनमधिकमिति वाच्यं। प्रतियोगिताविशेषसंबंधावच्छिन्न
वह्न्यभावविशिष्टाभाववैशिष्ट्यावगाहिप्रत्यक्षादौ व्यतिरेकव्याप्तिविषयकपरामर्शघटितानुमितिसामग्र्या
ःप्रतिबंधकत्वाकल्पनेन लाघवात्। तादृशसामग्रीदशायामभावो न वह्नीयत्वेत्यादिबाधाद्यभावस्यावश्य
कतया तादृशायां विशेषणतावच्छेदकप्रकारकनिर्णयरूपकारणविरहेणैव तादृशप्रत्यक्षस्यापत्तेः सि
द्धेरिष्यते तत्र वह्निमानित्याकारतां दर्शयति। साध्याभावविरोधिनेति। एतच्च पक्षैकदेशे इतरसिद्धौ न प्रकृ

ग० टी० १८ १२६

रिकैवानुमितिरिति मूलोक्तमतेनावह्न्यभावादिनिषेधनपेतिवक्ष्यमाणमते तु कालिकादिसंबंधावच्छि
न्नवह्न्यभावाभावसिद्धिशंकावारणायेदं। तन्नते व्यतिरेकिणि वह्निमानित्यनुमितेरेवासत्त्वादिति तोध्यंस्व
न्वयेन गम्यगमकभाव इति योजना। अन्वयेन हेतुमति साध्यान्वयेनेत्यर्थः। साध्याभाववत्त्वसाधनाभाव
त्वाभ्यामित्यनुपदं स्फुटमेतत्। समाधानासंगतिरिति। तथा साध्यप्रसिद्धेस्तादृशानुमितावनपेक्षणा
त्। दर्शितपूर्वपक्षाशयेऽउपष्टंभकं द्वितीयसामग्रीतः फलोत्पत्तिमभिप्रेत्याह साध्यसंदेह इति। एवं च पा
क्षैकदेशे साध्यप्रसिद्धिमालंब्य समाधानं प्रथमसामग्रीतः अनुमित्युत्पत्त्यभिप्रायकमिति भावः। त
द्वमितावच्छेदकतापन्नधर्मो वह्नित्वत्वादिः। इंधनत्ववतोऽभावः तद्विशेषणकेति धूमाभाववत्त्वविशिष्ट
प्रतियोगिकवैशिष्ट्यानवगाहिनीत्यर्थः। तादृशप्रत्यक्षस्य वह्न्यानलेक्षणरूपसन्निकर्षविधया त राम०
ज्ञानस्यावश्यकत्वादिति भावः। उपलक्षणीभूतेति तन्निष्ठव्यापकतावच्छेदकत्वग्रहमनपेक्ष्यापि १८०

तदवच्छिन्नाभावज्ञानादनुमित्यापत्तिरिति वाच्यं · अभावांशे प्रतियोगिप्रकारतायां अवच्छेदकं जाति
विशेषणे प्रतियोगितावच्छेदकघटकतयाऽभासमानस्य विशेषणतयाऽजनकतावच्छेदकतया निवे
शात् · अथैवं व्यापकताज्ञानकारणतामतनिराकरणावसरे पक्षधर्मत्वोपलक्षितधूमसमानाधि·
करणाभावप्रतियोगितानवच्छेदकत्वज्ञानासंभवप्रदर्शनं असंगतं · तादृशावच्छेदकत्वावच्छिन्नप्र
तियोगिताप्रकारकाभावविशेष्यकत्वसंभवात् प्रतियोगिताप्रकारकस्योपलक्षणाविषयकत्वात्
रुक्तदृष्टान्तस्तात्पर्यादिदृष्टसामान्यसंशयविरोधित्वस्यापि नापत्तिः प्रतियोगितासंसर्गकज्ञानस्यैव प्रति
बन्धकत्वात् · मैवं · तथा सति प्रतियोगितप्रकारकस्य धूमसमानाधिकरणघटाभावप्रतियोगितानवच्छे·
दकत्वज्ञानस्यापि कारणत्वापातात् पर्वतादिधूमीति ज्ञानस्य प्रमात्वाच्च · न च धूमादिसमानाधिकरणाभा
वप्रतियोगितावच्छेदकतात्वघटकतत्तत्पदार्थातिरिक्तानवच्छिन्नत्वरूपतादृशावच्छेदकतापर्याप्तावच्छे

ग०टी० १८१ दकतावगाहिज्ञानत्वेनहेतुत्वेमहागौरवात्॰ नचव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानहेतुतापत्तेतादृशाघ
टाभावप्रतियोगितानवच्छेदकताज्ञानवारणायतन्निवेशआवश्यकइतिवाच्यं॰ तन्मतेप्रतियोगितासंसर्ग
८१२ कज्ञानस्यैवहेतुत्वात्तत्रचप्रतियोगिप्रकारतावच्छेदकपर्याप्त्यवच्छेदकताकप्रतियोगितायाएवसंसर्ग
तयाघटाघनवगाहिहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकंवह्नित्वमितिज्ञानेहेतुघटत्वाभा
वप्रतियोगितावच्छेदकत्वपर्याप्तप्रतियोगितावच्छेदकतायाएवसंसर्गत्वात्तन्निवेशंविनातादृशज्ञानवार
णात्स्वाभावविषयतायांहेतुसमानाधिकरणाभाववत्त्वातिरिक्तानवच्छिन्नत्वनिवेशोपक्षेपिप्रतियो
गित्वादिविषयतायांतत्तत्पदार्थातिरिक्तानवच्छिन्नत्वानिवेशेनलाघवाच्च॰ अस्मात्तुव्यापकाभाववत्त्व
ज्ञानकारणतावच्छेदकेप्रतियोगितांशेव्यापकतावच्छेदकत्वोपलक्षितपर्याप्त्यवच्छेदकताकत्वावगा राम० १८१
हित्वनिवेशः व्यापकतावच्छेदकत्वेतराऽनवच्छिन्नत्वेचपर्याप्त्यर्थइति।दोषितिविरोधमाहएवंसतीति।वि

ग० टी० १८२ २७५

शिष्टपरामर्शरूपत्वासंभवादित्तितत्राप्युक्तरीत्याव्याप्तेर्विशिष्टद्वयरूपतयानुमितिहेतुत्वानुपपत्तेरि
तिभावः।समानविशेष्यकत्वस्यातंत्रत्वेपर्वतत्वेनैकपर्वतेपरामर्शात्पर्वतत्वेनपर्वतांतरे।नुमितिदर्शनादि
तिभावः।साध्यप्रसिद्धीतिनत्वसंशयात्मकप्रसिद्ध्यैतयानुमित्तावपिनिश्चयात्मकप्रसिद्धेर्विशेषणताव
च्छेदकप्रकारकनिर्णायकतयाविशिष्टवैशिष्ट्यावगाहित्वंदुर्वारमितिवाच्यं।साध्याप्रसिद्धीतिव्याप्यवगाहिप
रामर्शस्यविशिष्टवैशिष्ट्यविषयकानुमितिविरोधित्वात्॥छ॥इतिव्यतिरेकिग्रंथः॥संवत १८४६ फाः सुदी ५

राम० १८२